**दिनाङ्कः-22.04.2025** **सायम् - 06:20**

**मुख्यवार्ता:**

- प्रधानमन्त्री नरेन्द्रमोदी अरबदेशस्य आधिकारिक-द्विदिवसीय-यात्रायां जेद्दाह इति नगरं सम्प्राप्त:, तेनोक्तं यत् भारतदेश: सऊदी-अरब इति देशेन सह-दैर्घकालिकेभ्य: ऐतिहासिकेभ्यश्च सम्बन्धेभ्य: अत्यधिकं महत्वं ददातीति।
- जम्मूकश्मीरे अज्ञात-आततायिभि: अद्य मध्याह्ने अनन्तनागजनपदस्य पहलगाम इति क्षेत्रे पर्यटकानां समूहैकस्मिन् आक्रमणं कृतम्। प्रधानमन्त्रिणा गृहमन्त्री अपि अस्य स्थलस्य निरीक्षणाय निर्दिष्ट: ।
- उपराष्ट्रपतिना जगदीपधनखड़ेन उक्तं यत् संसदाख्यं सदनं सर्वोच्चमस्ति, निर्वाचिता: प्रतिनिधयश्च सम्विधानस्य विषयवस्तूनां निर्धारणे अन्तिमा: स्वामिन: सन्तीति।
- अमरिकादेशस्य उपराष्ट्रपतिना जे सी वेंस इत्यनेन प्रोक्तं यत् अमरिकाभारतयोर्मध्ये संयुक्ता: वाणिज्यिक-गतिविधय: उभयोर्देशयो: सम्बन्धेषु निर्धारितमस्तीति।
- आईपीएल क्रिकेट-क्रीडा-स्पर्धा-मालिकायां, लखनऊ-सुपर-जायंट्स-दलस्य सङ्घर्षात्मकं साम्मुख्यम् अद्य सायं सार्धसप्तवादने लखनऊ-नगरे दिल्ली-कैपिटल्स इति दलेन सह भविष्यति।

**प्रधानमन्त्री -सऊदी-यात्रा**

प्रधानमन्त्री नरेन्द्रमोदी अरबदेशस्य आधिकारिक-द्विदिवसीय-यात्रायां जेद्दाह इति नगरं सम्प्राप्त:, तेनोक्तं यत् भारतदेश: सऊदी-अरब इति देशेन सह-दैर्घकालिकेभ्य: ऐतिहासिकेभ्यश्च सम्बन्धेभ्य: अत्यधिकं महत्वं ददातीति। जेद्दा-प्रापणानन्तरं श्रीमोदिन: स्वागतं एकविंशति: तोपाख्यै: विस्फोटकशस्त्रै: सह जातम्। विशेषसम्मानत्वेन प्रधानमन्त्रिण: वायुयानस्य सऊदी विमानक्षेत्रे प्रवेशानन्तरं तत्रत्यै: सैन्यविमानै: चक्रीयसंरक्षायां नीत्वा ससम्मानं विमानस्थाने अवतारितम्। उपक्रमेऽस्मिन् सऊदीवायुसेनाया: एफ-फिफ्टीन इति विमानानि अनुरक्षणम् अददन्। श्रीमोदी तत्रत्यस्य युवराजस्य प्रधानमन्त्रिणश्च मोहम्मद-बिन-सलमान् इत्यस्य निमन्त्रणे अस्ति, श्रीमोदिन: सऊदी-राष्ट्रस्य एषा तृतीया यात्रा वर्तते। श्रीमोदिना क्षेत्रीयशान्त्या:, समृद्धे:, सुरक्षायाश्च सम्बर्धने उभयो: देशयो: संयुक्त-हितेषु बलं दत्तम्। एकस्मिन् सामाजिकान्तर्जालीये सन्देशे श्रीमोदी उक्तवान् यत् एषा यात्रा भारत-सऊदी अरब-देशयोः मैत्रीं सुदृढां करिष्यति।

**उपराष्ट्रपति:/ धनखड़:**

उपराष्ट्रपतिना जगदीपधनखड़ेन उक्तं यत् संसदाख्यं सदनं सर्वोच्चमस्ति, निर्वाचिता: प्रतिनिधयश्च सम्विधानस्य विषयवस्तूनां निर्धारणे अन्तिमा: स्वामिन: सन्तीति। अद्य दिल्ली विश्वविद्यालये समायोजिते एकस्मिन् कार्यक्रमे भाषमाणेन उपराष्ट्रपतिना उक्तं यत् संसत् राष्ट्रस्य प्रत्येकं जनवत् सर्वोच्चस्थानं धत्ते। तेनोक्तं यत् सम्विधाने संसद: उन्नततरं स्थानं कस्यापि प्राधिकारस्य कल्पनाऽपि न कृतास्तीति। उपराष्ट्रपतिना प्रोक्तं यत् भारतीयजनै: आत्मन: अभिव्यक्त्यै, स्वेच्छायै, आत्मन: अपेक्षाणां प्रतिविम्बनाय च सम्विधानान्तर्गतं स्वप्रतिनिधय: चिता:, ते प्रतिनिधय: च निर्वाचनकाले उत्तरदायिनोऽपि भवन्ति।

**वित्तमन्त्री सीतारामन: स्टैनफो**

वित्तमन्त्रिणा निर्मलासीतारामनेन प्रोक्तं यत् सप्तचत्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसितराष्ट्रभवनस्य भारतस्य यात्रा न केवलम् एका आकांक्षा वर्तते, अपितु एकं संयुक्त-राष्ट्रियाभियानमस्तीति। तया प्रोक्तं यत् विकसितभारताभियानं समावेशयुतं, स्थिरं, नवाचाराधारितं, विकासदृष्टिकोणेन प्रेरितञ्चास्ति। वित्तमन्त्रिणा अद्य अमरिकाया: स्टेनफोर्ड-इति विश्वविद्यालये प्रदत्त-सम्बोधनावधौ उक्तं यत् भारतं विश्वस्य दशम-अर्थव्यवस्थाया: पञ्चम-अर्थव्यवस्था सञ्जातमस्ति। एतदस्ति भारतस्य वरीवर्धमानया शक्त्या सह वैश्विकप्रासङ्गिकतायाश्च स्पष्टं सङ्केतमिति।

**अमरिका-उपराष्ट्रपति/जयपुरयात्रा**

अमरिकादेशस्य उपराष्ट्रपतिः जे सी वेंस इत्येषः भारतस्य जयपुरनगरस्य यात्रायाम् अस्ति। अवसरेऽस्मिन् तेन वार्ताहरैः सह वार्ताप्रसङ्गे प्रोक्तं यत् अमरिकाभारतयोर्मध्ये संयुक्ताः वाणिज्यिक-गतिविधयः उभयोर्देशयोः सम्बन्धेषु निर्धारितमस्तीति।

**जम्मूकश्मीर सङ्घर्षः**

जम्मूकश्मीरे अज्ञात-आततायिभिः अद्य मध्याह्ने अनन्तनागजनपदस्य पहलगाम अति क्षेत्रे पर्यटकानां समूहैकस्मिन् आक्रमणं कृतम्। व्रणिताः यात्रिणः जनपदचिकित्सालये उपचार्यन्ते। आततायिनश्च सुरक्षाबलेन चक्रीयसंरचनापूर्वकम् अन्विष्यमाणाः सन्तीति सूचनास्ति। प्रधानमन्त्री नरेन्द्र मोदी अद्य केन्द्रीय गृहमन्त्रिणा अमितशाहेन सह पहलगाम आतङ्कयाक्रमणस्य विषये वार्ताम् अकरोत्। दिङ्निर्देशं च अयच्छत्। अस्याः दुर्घटनायाः राज्यपाल-मुख्यमन्त्रिभ्यामपि निन्दा कृता।

**जम्मूकश्मीरस्य रामबन□**

जम्मूकश्मीरस्य रामबनेति जनपदे रविवासरे मेघस्फोटानन्तरं पुनरुद्धार साहयोगिकानि च कार्याणि युद्धस्तरेण सम्पाद्यन्ते। तत्र षडशीत्यधिकचतुश्शतोत्तरैक-सहस्राणि वितरण-ट्रांसफार्मर-इत्याख्यानि यन्त्राणि पुनस्सक्रियाणि कृतानीति संसूचना वर्तते। केन्द्रीयमन्त्रिणा डॉ. जितेन्द्र-सिंहेन अद्य प्रोक्तं यत् सर्वाण्यपि विद्युतवितरण यन्त्राणि सद्यः एव सञ्चालितानि स्युरिति प्रयासो विधीयते। तेनोक्तं यत् श्वस्तनं यावत् राष्ट्रिय-राजमार्गोऽपि आंशिकरूपेण सक्रियः भविष्यति। पेयजलस्य उपलब्धतेति विषये भाषमाणेन श्रीसिंहन प्रोक्तं यत् अष्टनवतिः जलापूर्ति-योजनासु नवाशीतिः योजनाः सञ्चालिताः सन्ति जाताः। अवशिष्टाः नवयोजनाः अपि सद्यः एव चालिताः स्युरिति धिया कार्याणि प्रचाल्यन्ते। मन्त्रिणा प्रशासनस्य प्रशंसां कुर्वता प्रोक्तं यत् तद्धि सर्वातिप्रतिकूलपरिस्थितावपि सर्वश्रेष्ठप्रदर्शनं कुर्वदस्तीति। जम्मूकश्मीरस्य मुख्यमन्त्री उमर-अब्दुल्ला जलाप्लावस्य स्थितेः निरीक्षणेन सह आपदुद्धार विषये अधिकारिभिस्समं चर्चायै तत्र गच्छन्नस्ति।

**यूपीएससी परिणामः**

संघ-लोक-सेवा-आयोगेन चतुर्विंशत्यधिक द्विसहस्रतम-वर्षस्य प्राशासनिक-सेवा- परीक्षायाः अन्तिम परिणामाः घोषिताः।आयोगेन नियुक्त्यै नवोत्तरैकसहस्रं यावत् अभ्यर्थिनाम् अनुशंसा कृता, यस्मिन् पञ्चविंशत्यधिक-सप्तशतं यावत् पुरुषाः चतुरशीत्यधिक - द्विशतं महिलाः च सन्ति चिताः। शीर्ष-पञ्चविंशतिः अभ्यर्थिसु एकादश-महिलाः चतुर्दशपुरुषाश्च सन्ति, शीर्षपञ्चसु अभ्यर्थिसु तिस्रः महिलाः द्वौ पुरुषौ च सन्ति । शक्तिदुबे इत्यनया चतुर्विंशत्यधिक द्विसहस्रतमवर्षस्य लोकसेवापरीक्षायां, प्रथमं स्थानं प्राप्तम्। अवधेयं वर्तते यत् लोकसेवापरीक्षायाः लिखितपरीक्षा गतवर्षस्य सितम्बरमासे संघलोकसेवाआयोगेन आयोजिता, तदनन्तरं अस्मिन् वर्षे जनवरीतः अप्रैलमासं यावत् व्यक्तित्वपरीक्षायै साक्षात्काराः अभवन्। अस्यां प्रतिष्ठितपरीक्षायां चतुर्थस्थानं प्राप्तवत्या मार्गी-चिराग-शाह इत्यनया प्रोक्तं यत् सा सन्नद्धतायै प्रायशः दशहोरात्मकमध्ययनं करोतिस्म, तयाचोक्तं यत् सेवाप्रापणानन्तरं सा महिलासशक्तिकरणाय शिक्षाक्षेत्रे च विशेषकार्यं करिष्यतीती। सा आकाशवाण्या सह अपि सम्वादम् अकरोत्

अन्येन चैकेन सफलाभ्यर्थिना आकाशगर्गेणापि आकशवाण्या सह सम्वादो विहितः तेन पञ्चमं स्थानमस्ति सम्प्राप्तम्

**न□ल-खट्टर-भ्रमणम्**

केन्द्रीयविद्युदावास-नगरीय-कार्याणां मन्त्री मनोहरलाल-खट्टरः परस्पर-हितानां प्रमुख-विद्युत्-क्षेत्रीय परियोजनासु चर्चायै द्वयोः राष्ट्रयोः द्विपक्षीय-सहकार्यं सुदृढं कर्तुञ्च नेपाल देशस्य द्विदिवसीय-आधिकारिक-यात्रायाम् अस्ति। देशस्य राजधान्यां काठमाण्डू इति क्षेत्रं सम्प्राप्तेः अनन्तरं नेपालसर्वकारस्य ऊर्जा सचिवः सुरेशाचार्यः, नेपालदेशे भारतस्य राजदूतः नवीनश्रीवास्तवः, अन्ये च वरिष्ठाधिकारिणः श्रीमतः खट्टरवर्यस्य हार्दिकं स्वागतम् अकुर्वन्।

**मध्यप्रदेशे दुर्घटना**

मध्यप्रदेशस्य दमोहमण्डले अद्य यात्रीवाहनम् अनियन्त्रणं भूय खात्यां पतितम्। दुर्घटनायाम् एकस्यैव परिवारस्य अष्टसदस्यानां मृत्युः अभवत् यस्मिन् पञ्चमहिला: त्रय: बालका: आसन् । पञ्च जनाः गम्भीररूपेण घातिताः सन्ति, ते दमोहनगरस्य जनपदचिकित्सालये प्रवेशिताः सन्ति।

**आई.पी.एल् क्रिकेट्-स्पर्धा**

आईपीएल क्रिकेट-क्रीडा-स्पर्धा-मालिकायां, लखनऊ-सुपर-जायंट्स-दलस्य सङ्घर्षात्मकं साम्मुख्यम् अद्य सायं सार्धसप्तवादने लखनऊ-नगरे दिल्ली-कैपिटल्स इति दलेन सह भविष्यति। अवधेयं वर्तते यत् दिल्ली-कैपिटल्स दलम् अंकतालिकायां द्वितीये स्थाने तत्रैव लखनऊ-सुपर-जायंट्स दलम् पंचम-स्थाने अस्ति। गतरात्रौ शुभमनगिल-नेतृत्वयुतेन गुजरात-टाइटन्सदलेन कलकातानगरे ईडनगार्डन्सक्रीडाङ्गणे कोलकाता-नाइट-राइडर्स-दलम् नवत्रिंशत्धावनाङ्कैः पराभूतम्।

**॥ इति वार्ताः ॥**